শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

## শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে

# ॥ ৱিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ ৱিংশঃ সর্গঃ ॥

## শার্দূলপ্রেরণযা রাৱণেন শুকং দূতীকৃত্য তদ্দ্বারা সুগ্রীৱসন্নিধে সন্দেশস্য প্রেষণম্, তত্র ৱানরকৃতা তদীযা দুরৱস্থা, শ্রীরামস্যানুগ্রহেণ তস্য ক্লেশতো মোক্ষণং সুগ্রীৱেণ চ রাৱণং প্রত্যুত্তরদানম্

ততো নিৱিষ্টাং ধ্ৱজিনীং সুগ্রীৱেণাভিপালিতাম্।
দদর্শ রাক্ষসোঽভ্যেত্য শার্দূলো নাম ৱীর্যৱান্॥ **6.20.1** ॥

চারো রাক্ষসরাজস্য রাৱণস্য দুরাত্মনঃ।
তাং দৃষ্টৱা সর্ৱতোঽৱ্যগ্রাং প্রতিগম্য স রাক্ষসঃ॥ **6.20.2** ॥

আৱিশ্য লঙ্কাং ৱেগেন রাজানমিদমব্রৱীৎ।
এষ ৱৈ ৱানরর্ক্ষৌঘো লঙ্কাং সমভিৱর্ততে॥ **6.20.3** ॥

অগাধশ্চাপ্রমেযশ্চ দ্ৱিতীয ইৱ সাগরঃ।
পুত্রৌ দশরথস্যেমৌ ভ্রাতরৌ রামলক্ষ্মণৌ॥ **6.20.4** ॥

উত্তমৌ রূপসম্পন্নৌ সীতাযাঃ পদমাগতৌ।
এতৌ সাগরমাসাদ্য সন্নিৱিষ্টৌ মহাদ্যুতে॥ **6.20.5** ॥

বলং চাকাশমাৱৃত্য সর্ৱতো দশযোজনম্।
তত্ত্ৱভূতং মহারাজ ক্ষিপ্রং ৱেদিতুমর্হসি॥ **6.20.6** ॥

তৱ দূতা মহারাজ ক্ষিপ্রমর্হন্তি ৱেদিতুম্।
উপপ্রদানং সান্ত্বং ৱা ভেদো ৱাত্র প্রযুজ্যতাম্॥ **6.20.7** ॥

শার্দূলস্য ৱচঃ শ্রুৎৱা রাৱণো রাক্ষসেশ্ৱরঃ।
উৱাচ সহসা ৱ্যগ্রঃ সম্প্রধার্যার্থমাত্মনঃ।
শুকং সাধু তদা রক্ষো ৱাক্যমর্থৱিদাং ৱরম্॥ **6.20.8** ॥

সুগ্রীৱং ব্রূহি গৎৱাঽঽশু রাজানং ৱচনান্মম।
যথাসন্দেশমক্লীবং শ্লক্ষ্ণযা পরযা গিরা॥ **6.20.9** ॥

ৎৱং ৱৈ মহারাজকুলপ্রসূতো
মহাবলশ্চর্ক্ষরজঃসুতশ্চ।
ন কশ্চনার্থস্তৱ নাস্ত্যনর্থ -
স্তথাপি মে ভ্রাতৃসমো হরীশ॥ **6.20.10** ॥

অহং যদ্যহরং ভার্যাং রাজপুত্রস্য ধীমতঃ।
কিং তত্র তৱ সুগ্রীৱ কিষ্কিন্ধাং প্রতি গম্যতাম্॥ **6.20.11** ॥

নহীযং হরিভির্লঙ্কা প্রাপ্তুং শক্যা কথঞ্চন।
দেৱৈরপি সগন্ধর্ৱৈঃ কিং পুনর্নরৱানরৈঃ॥ **6.20.12** ॥

স তদা রাক্ষসেন্দ্রেণ সন্দিষ্টো রজনীচরঃ।
শুকো ৱিহঙ্গমো ভূৎৱা তূর্ণমাপ্লুত্য চাম্বরম্॥ **6.20.13** ॥

স গৎৱা দূরমধ্ৱানমুপর্যুপরি সাগরম্।
সংস্থিতো হ্যম্বরে ৱাক্যং সুগ্রীৱমিদমব্রৱীৎ॥ **6.20.14** ॥

সর্ৱমুক্তং যথাঽঽদিষ্টং রাৱণেন দুরাত্মনা।
তৎ প্রাপযন্তং ৱচনং তূর্ণমাপ্লুত্য ৱানরাঃ॥ **6.20.15** ॥

প্রাপদ্যন্ত তদা ক্ষিপ্রং লোপ্তুং হন্তুং চ মুষ্টিভিঃ।
সর্ৱৈঃ প্লৱঙ্গৈঃ প্রসভং নিগৃহীতো নিশাচরঃ॥ **6.20.16**॥

গগনাদ্ ভূতলে চাশু প্রতিগৃহ্যাৱতারিতঃ।
ৱানরৈঃ পীড্যমানস্তু শুকো ৱচনমব্রৱীৎ॥ **6.20.17**॥

ন দূতান্ ঘ্নন্তি কাকুৎস্থ ৱার্যন্তাং সাধু ৱানরাঃ।
যস্তু হিৎৱা মতং ভর্তুঃ স্ৱমতং সম্প্রধারযেৎ।
অনুক্তৱাদী দূতঃ সন্ স দূতো ৱধমর্হতি॥ **6.20.18**॥

শুকস্য ৱচনং রামঃ শ্রুৎৱা তু পরিদেৱিতম্।
উৱাচ মাৱধিষ্টেতি ঘ্নতঃ শাখামৃগর্ষভান্॥ **6.20.19**॥

স চ পত্রলঘুর্ভূৎৱা হরিভির্দর্শিতেঽভযে।
অন্তরিক্ষে স্থিতো ভূৎৱা পুনর্ৱচনমব্রৱীৎ॥ **6.20.20**॥

সুগ্রীৱ সত্ত্ৱসম্পন্ন মহাবলপরাক্রম।
কিং মযা খলু ৱক্তৱ্যো রাৱণো লোকরাৱণঃ॥ **6.20.21**॥

স এৱমুক্তঃ প্লৱগাধিপস্তদা
 প্লৱঙ্গমানামৃষভো মহাবলঃ।
উৱাচ ৱাক্যং রজনীচরস্য
 চারং শুকং শুদ্ধমদীনসত্ত্ৱঃ॥ **6.20.22**॥

ন মেঽসি মিত্রং ন তথানুকম্প্যো
 ন চোপকর্তাসি ন মে প্রিযোঽসি।
অরিশ্চ রামস্য সহানুবন্ধ -
 স্ততোঽসি ৱালীৱ ৱধার্হ ৱধ্যঃ॥ **6.20.23**॥

নিহন্ম্যহং ৎৱাং সসুতং সবন্ধুং
 সজ্ঞাতিৱর্গং রজনীচরেশ।

লঙ্কাং চ সর্ৱাং মহতা বলেন
সর্ৱৈঃ করিষ্যামি সমেত্য ভস্ম॥ **6.20.24** ॥

ন মোক্ষ্যসে রাৱণ রাঘৱস্য
সুরৈঃ সহেন্দ্রৈরপি মূঢ গুপ্তঃ।
অন্তর্হিতঃ সূর্যপথং গতোঽপি
তথৈৱ পাতালমনুপ্রৱিষ্টঃ।
গিরীশপাদাম্বুজসঙ্গতো ৱা
হতোঽসি রামেণ সহানুজস্ত্ৱম্॥ **6.20.25** ॥

তস্য তে ত্রিষু লোকেষু ন পিশাচং ন রাক্ষসম্।
ত্রাতারং নানুপশ্যামি ন গন্ধর্ৱং ন চাসুরম্॥ **6.20.26** ॥

অৱধীস্ত্ৱং জরাৱৃদ্ধং গৃধ্ররাজং জটাযুষম্।
কিং নু তে রামসান্নিধ্যে সকাশে লক্ষ্মণস্য চ।
হৃতা সীতা ৱিশালাক্ষী যাং ৎৱং গৃহ্য ন বুধ্যসে॥ **6.20.27** ॥

মহাবলং মহাত্মানং দুরাধর্ষং সুরৈরপি।
ন বুধ্যসে রঘুশ্রেষ্ঠং যস্তে প্রাণান্ হরিষ্যতি॥ **6.20.28** ॥

ততোঽব্রৱীদ্ ৱালিসুতোঽপ্যঙ্গদো হরিসত্তমঃ।
নাযং দূতো মহারাজ চারকঃ প্রতিভাতি মে॥ **6.20.29** ॥

তুলিতং হি বলং সর্ৱমনেন তৱ তিষ্ঠতা।
গৃহ্যতাং মাগমল্লঙ্কামেতদ্ধি মম রোচতে॥ **6.20.30** ॥

ততো রাজ্ঞা সমাদিষ্টাঃ সমুৎপত্য ৱলীমুখাঃ।
জগৃহুশ্চ ববন্ধুশ্চ ৱিলপন্তমনাথৱৎ॥ **6.20.31** ॥

শুকস্তু ৱানরৈশ্চণ্ডৈস্তত্র তৈঃ সম্প্রপীডিতঃ।
ৱ্যাচুক্রোশ মহাত্মানং রামং দশরথাত্মজম্।
লুপ্যেতে মে বলাৎ পক্ষৌ ভিদ্যতে মে তথাক্ষিণী॥ **6.20.32** ॥

যাং চ রাত্রিং মরিষ্যামি জাযে রাত্রিং চ যামহম্।
এতস্মিন্নন্তরে কালে যন্ময়া হ্যশুভং কৃতম্।
সর্ৱং তদুপপদ্যেথা জহ্যাং চেদ্ যদি জীৱিতম্॥ **6.20.33** ॥

নাঘাতযৎ তদা রামঃ শ্রুৎৱা তৎপরিদেৱিতম্।
ৱানরানব্রৱীদ্ রামো মুচ্যতাং দূত আগতঃ॥ **6.20.34** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে ৱিংশঃ সর্গঃ ॥